एक-द्वि-युष्मद्-अस्मद्-भवत्-किम्” इत्युक्तवान्। यथा शाकुन्तले २ अङ्के। “विश्रान्तेन भवता ममाप्येकस्मिन् कर्म्मणि सहायेन भवितव्यम्”। पुं, स्वनामख्यात ऐलवंशीयो नृपतिभेदः। यथा, भागवते ९।१५।२।
‘श्रुतायोर्वसुमान् पुत्त्रः सत्यायोश्च श्रुतं जयः।
रयस्य सुतएकश्च जयस्य तनयोऽमितः’॥
परमेश्वरः। विष्णुः। यथा विष्णुसंहितायाम्। “एको नैकः सवः कः किम्”। “परमार्थतः सजातीयविजातीयस्वगतभेदराहित्यादेकः”। इति भाष्यम्। घटे घटान्तरात् भेदः सजातीयभेदः। घटे पटात् भेदः विजातीयभेदः। घटे कपालादेर्भेदः स्वगतभेदः॥)

एककः त्रि, (“एकादाकिनिच्चासहाये”। ५।३।५२। इत्यत्र चकारात् पक्षे कन्।) असहायः। एकला इति भाषा। तत्पर्य्यायः। एकः २ एकाकी ३। इत्यमरः॥
(“महानप्येकको वृक्षः सर्व्वतः सुप्रतिष्ठितः।
प्रसह्यैव हि वातेन शक्यो धर्षयितुं यतः”॥
इति पञ्चतन्त्रे ३।५२।॥ तथा नैषधे। २। ३६।
“विधिरेककचक्रचारिणम्
किमु निर्म्मित्सति मान्मथं रथम्”॥)

एककुण्डलः पुं, (एकं कुण्डलं यस्य।) बलरामः। कुवेरः। इति मेदिनी॥

एकगुरुः, पुं, (एको गुरुर्यस्य।) सतीर्थः। इत्यमरः॥ एकगुरुर शिष्य इति भाषा॥

एकचक्रं, क्ली, (एकं चक्रं यस्य।) पुरीविशेषः। तत्पर्य्यायः। हरिग्टहम्२ शुम्भपुरी३। इति त्रिकाण्डशेषः॥ सूर्य्यरथः। त्रि, असहायचारी। यथा, ऋग्वेदे १।१६४।२।
“सप्त युञ्जन्ति रथमेकचक्र-
मेकोऽश्वो वहति सप्तनामा।
त्रिनाभिचक्रमजरमनर्व्वं
यत्रेमा विश्वा भुवनाधितस्थुः”॥
अत्र भाष्यकृता यद्व्याख्यातन्तदाह।
“एकचक्रमेकरथाङ्गोपेतम्। यद्यपि त्रीणि चक्राणि तथापि तेषामेकरूपत्वादेकचक्रमित्युच्यते रथं रंहणस्वभावं ‑र्थस्य सम्बन्धिनं सप्तैतत्संख्यका अश्वा युञ्जन्ति अनुबध्नन्ति वहन्त्यहोरात्रनिर्वाहाय। किं वस्तुतः सप्त नेत्याह। एकोऽश्वः सप्तनामा। एक एव सप्ताभिधानः सप्तधा नमनप्रकारो वा एक एव वायुः सप्तरूपं धृत्वा वहतीत्यर्थः। वाय्वधीनत्वादन्तरीक्षसञ्चारस्य एकचक्रमित्युक्तम्। कीदृशन्तदित्यत आह। त्रिनाभि वलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतम्। अंजरममरणधर्म्माकम्। अनर्व्वमशिथिलं पुनस्तदेव विशेष्यते। यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि प्रसिद्धानि सर्व्वाणि भूतजातान्यधि आश्रित्य तस्थुस्तिष्ठन्ति। यद्वा एकचक्रमेकचारिणमसाहाय्येन सञ्चरन्तं रथमादित्यं सप्त युञ्जन्ति सर्पणस्वभावाः सप्तसंख्या वा रश्मयः सप्तप्रकारकार्य्या असाधारणाः परस्परविलक्षणाः षड़्तवः एकः साधारण इत्येवंरूपा यद्वा मासद्वयात्मकाः षट् अपरोऽधिमासात्मक एक इत्येवं सप्तर्त्तवो युञ्जन्ति एतस्य कार्य्यं निर्व्वहन्तीत्यर्थः। स चैकोऽसहायोऽश्वो व्यापनशील आदित्यः सप्तनामा सप्तरसानां सन्नमयितारो रश्मयो यस्य तादृशः। सप्तर्षिभिः स्तूयमानो वादित्यो वहति धारयति भ्रमतीत्यर्थः। किं भूतम्। त्रिनाभि चक्रम्। त्रयो नाभिस्थानीयाः सन्ध्यासम्बद्धा वा एव ऋतवो यस्य तत्तादृशम्। के ते ग्रीष्मवर्षाहेमन्ताख्याः यद्वा भूतभविष्यद्वर्त्तमानाख्यास्त्रयः कालास्त्रिनाभयः। तद्विशिष्टं चक्रं चक्रवत् पुनः पुनः परिभ्रममाणं संवत्सराख्यचक्रमजरममरणम्। न हि कदाचिदपि कालो म्रियते अनादिनिधनः कालः इति स्मृतेः। अनर्व्वमप्रतिहतम्। ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतमयमादित्यः पुनः पुनरावर्त्तयति संवत्सरादर्वाचीनानां तत्रैवान्तर्भावात् युगादीनां तदावृत्तिसाध्यात् संवत्सरस्य चक्रत्वेन रूपणम्। पुनः कीदृशं तत्। यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि सर्व्वाणि भूतान्यधितस्थुः आश्रित्य तिष्ठन्ति कालाधीनत्वात् सर्व्वस्याः स्थितेः। ईदृशस्य कालस्य कारणभूतपरमेश्वरपरिज्ञानेन मोक्षसद्भावात् ज्ञानमोक्षाक्षरप्रशंसा च”॥ नृपाद्वयविशिष्टम्। एकराजविशिष्टम्। यथा, भागवते ।३।१।२०।
“इत्थं व्रजन् भारतमेव वर्षं
कालेन यावत् गतवान् प्रभासम्।
तावच्छशास क्षितिमेकचक्रा-
मेकातपत्रामजितेन पार्थः”॥
पुं, असुरभेदः। यथा, हरिवंशे ३। ८४।
“एकचक्रो महाव`ऊस्तारकस्य महाबलः”।
अयं हि प्रतिविन्ध्य इ‑ि नाम्ना प्रसिद्धः। यथा। महाभारते १। सम्भवपर्व्वण्यंशावतरणे ६७।२२।
“एकचक्र इवि ख्यात आसीद्यस्तु महासुरः।
प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ”॥
स्त्री, स्वनामख्याता पुरी। अत्रस्थो भीमसेनो महाबलं वकनामानमसुरं हतवान्॥ यथा,— महाभारते। १। अंशावतारपर्व्वणि भारतसूत्रे। ६१। २६-२८।
“ते तत्र नियता कालम् कञ्चिद्दूषुर्नरर्षभाः।
मात्रा सहैकचक्रायां ब्राह्मणस्य निवेशने॥
तत्रासमाद क्षुधितं पुरुषादं वृकोदरः।
भीमसेनो महाबाहुर्व्वकं नाम महाबलम्॥
तञ्चापि पुरुषव्याघ्रो बाहुवीर्य्येण पाण्डवः।
निहत्य तरसा वीरो नागरान् पर्य्यसान्त्वयत्”॥)

एकचरः, पुं, (एकश्चरति यः। चर+पचाद्यच्।) हिंस्रपशुविशेषः। गण्डार इति भाषा। तत्पर्य्यायः। वार्द्धीनसः २ गण्डोत्साहः ३ गण्डकः ४। इति त्रिकाण्डशेषः॥
(सर्पादिः। यथा, मनुः। ५। १७।
“न भक्षयेदेकचरानज्ञातांश्च मृगद्विजान्”।
“ये एकाकिनः प्रायेण चरन्ति सर्पादयस्तानेकचरान्”। इति तट्टीकायां कुल्लूकभट्टः॥ (त्रि, एकाकिचारी। यूथभ्रष्टः। यथा, “अयमेकचरोऽभिवर्त्तते माम्”। इति किराते। १३।३। “एकचरो यूथादपेतः”। इति तट्टीका॥)

एकचारी, [न्] पुं, (एकः सन् चरतीति। चर्+णिनि।) बुद्धसहचारी। इति त्रिकाण्डशेषः॥ (एकचारिणि, त्रि॥)

एकजटा, स्त्री, (एका जटा यस्याः।
“एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका’।
इति श्रवणात्। यद्वा एका मुख्या जटा यस्याः।
“खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम्”।
इति च श्रवणात्तथात्वम्।) उग्रतारा। तस्या आविर्भावो यथा,—
“सर्व्वे सुरगणाः सेन्द्रास्ततो गत्वा हिमाचलम्।
गङ्गावतारनिकटे महामायां प्रतुष्टुवुः॥
अनेकसंस्तुता देवी तदा सर्व्वामरोत्करैः।
मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत॥
युष्माभिरमरैरत्र स्तूयते का च भाविनी।
किमर्थमागता यूयं मातङ्गस्याश्रमं प्रति॥
एवं ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषतः।
समुद्भूताब्रवीद्देवी मां स्तुवन्ति सुरा इति॥
शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान्।
तस्मात् थोर्व्वधायाहं स्तूयेऽद्य सकलैः सुरैः॥
विनिःसृतायां देव्यान्तु मातङ्ग्याः कायतस्तदा।
भिन्नाञ्जननिभा कृष्णा साभूत् गौरी क्षणादपि॥
कालिकाख्याभवत् सापि हिमाचलकृताश्रया।
तामुग्रताराम्र्षयो वदन्तीह मनीषिणः॥
उग्रादपि भयात् त्राति यस्माद्भक्तान् सदाम्बिका।
एतस्याः प्रथमं वीजं कथितं तन्त्रमेव च॥
एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका।
शृणुतं चिन्तनं चास्याः सम्यक् वेतालभैरवौ॥
यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम्।
चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम्॥
खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं त्वधः।
कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम्॥
खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम्।
मुण्डमालाधरां शीर्षे ग्रीवायामपि सर्व्वदा॥
वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम्।
कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम्॥
वामपादं शवहृदि संस्थाप्य दक्षिणं पदम्।
विन्यस्य सिंहपृष्ठे तु लेलिहानासवं स्वयम्॥
साट्टहासमहाघोरा रावयुक्तातिभीषणा।
चिन्त्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः॥ *॥
एतस्याः संप्रवक्ष्यामि या अष्टौ योगिनीस्तु ताः।
महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च॥
घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी।
भैरवी चाष्टमी प्रोक्ता योगिनीस्ताः प्रपूजयेत्”॥
इति कालिकापुराणे ६१ अध्यायः॥

एकजन्मा, [न्] पुं, (एकं मुख्यं जन्म यस्य। दिक्पालांशसम्भूतत्वादस्य तथात्वम्।) राजा। इति त्रिकाण्डशेषः॥ (एकं न द्वितीयं जन्म यस्य इत्यर्थे। शूद्रः। तस्य अद्विजत्वात् तथात्वम्।)